अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग् णौ । (३६/२५७०)

[1]सर्वं निवृत्तम्, अङ्गस्य इति वर्तते । अर्ति ह्री व्ली री क्नूयी क्ष्मायी इत्येतेषामङ्गानाम् आकारान्तानां च पुगागमो भवति णौ परतः । अर्ति – अर्पयति । ह्री – ह्रेपयति । व्ली – व्लेपयति । री – रेपयति । क्नूयी– क्नोपयति । क्ष्मायी – क्ष्मापयति । आकारान्तानाम् – दापयति । [2]धापयति । अर्ति इति 'ऋ गतिप्रापणयोः' (धा. पा. ९३७), 'ऋ गतौ' (धा. पा. १०९९) इति द्वयोरपि [3]धात्वोर्ग्रहणम् । री इत्यपि 'री गतिरेषणयोः' (धा. पा. १५०१), 'रीङ [4]श्रवणे' (धा. पा. ११३९) [5]इति । पुकः पूर्वान्तिकरणम् अदीदपत् इत्यत्र उपधाह्रस्वो यथा स्यात् इति ॥

शाच्छासाह्वाव्यावेपां युक् । (३७/२५८८)

शा छा सा ह्वा व्या वे पा इत्येतेषाम् अङ्गानां युगागमो भवति णौ परतः । शा – निशाययति । छा – अवच्छाययति । सा – अवसाययति । ह्वा – [6]ह्वाययति । व्या – संव्याययति । वे – वाययति । पा – पाययति । पाग्रहणे 'पै ओवै शोषणे' (धा. पा. ९२१, ९२२) इत्यस्यापीह ग्रहणमिच्छन्ति । 'पा रक्षणे' (धा. पा. १०५७) इत्यस्य लुग्विकरणत्वान् न भवति ।

[८४५] लुगागमस्तु तस्य वक्तव्यः । (म. भा. ३. ३२३)

पालयति ।

[८४६] धूञ्प्रीञोर्नुग्वक्तव्यः । (म. भा. ३. ३२३)

[7]धूनयति । प्रीणयति । एतेऽपि पूर्वान्ता एव क्रियन्ते, तेन न्यशीशयत्, अपीपलत्, अदूधुनत्, अपिप्रिणत् इति उपधाह्रस्वत्वं भवति ।

शाछासाह्वाव्यावेपां कृतात्वानां ग्रहणं पुकः प्राप्तिमाख्यातुम् । किमेतस्य आख्याने प्रयोजनम् ? एतस्मिन् प्रकरणे लक्षणप्रतिपदोक्तपरिभाषा (व्या.प. १३) नास्ति [8]इत्युपदिश्यते । तेन अध्यापयति, [9]जापयति इत्येवमादि सिद्धं भवति ॥

वो विधूनने जुक् । (३८/२५९०)

वा इत्येतस्य विधूननेऽर्थे [10]वर्तमानस्य जुगागमो भवति णौ परतः । [11]पक्षेणोपवाजयति । विधूनने इति किम्? आवापयति केशान् । किमर्थं सूत्रम्, 'वज गतौ' (धा. पा. २५२) ण्यन्तस्य सिद्धत्वात् ? वातेः पुक् मा भूत् इत्येवमर्थम् । 'पै ओवै शोषणे' (धा. पा. ९२१, ९२२) इत्येतस्य एतद् रूपम् ॥

---

1. सर्वं नास्ति क. 2. वापयति क, नास्ति इ. 3. धात्वोः नास्ति क. इ. 4. प्रस्रवणे ब. 5. च इत्यधिकम् इ. 6. अपह्वाययति ब. 7. विधूनयति क. ह. 8. इति प्रदर्श्यते क. 9. ज्ञापयति ह. 10. वर्तमानस्य नास्ति क. इ. 11. वाजयति ड, पक्षेणैव वाजयति ह.